655	Vêdântaparibhâshâ...	Dharmarâjâdhvarîndra.	Vêdânta ...	Do. ...	Do. ...	19	10	
656	Vêdântaśikhâmaṇi, com. on 655.	Râmakṛishṇadîkshita.	o. ...	Do. ...	Do. ...	63	10	
	32.—Vâlamûru Veṅkaṭasubbayya at Karêḍu.							
657	Smṛitikadamba ...	Kañcham Yellubhaṭṭa.	Dharma ...	Telugu ...	Palm leaves.	158	6	
658	Prâyaśchitta- and Vyavahâra-khaṇḍa.	Hêmâdri ...	Do. ...	Do. ...	Do. ...	216	7	Slightly damaged.
	33.—Vâlamûru Sîtârâmayya at Karêḍu.							
659	Nirṇayakaumudî ...	Veṅkaṭayajvan ...	Jyôtisha ...	Telugu ...	Palm leaves.	64	7	
660	Kṛishṇavêṇîmâhâtmya.	......	Purâṇa ...	Do. ...	Do. ...	36	7	

Number.	Name of book.	Name of author.	Subject.	Alphabet.	Material on which written.	Number of leaves.	Average number of lines per page.	Remarks.
	33.—Vâlamûru Sîtârâmayya at Karêḍu—*continued*.							
661	Jyôtishadarpaṇa ...	Kañcham Yellaya.	Jyôtisha ...	Telugu ...	Palm leaves.	225	6	
662*a*	Jyôtiḥpradîpikâ, com. on Jaiminisûtra.	Lakshmaṇa ...	Do. ...	Do. ...	Do. ...	61	6	Incomplete.
b	Phalaratnamâlâ ...	Kṛishṇamiśra ...	Do. ...	Do. ...	Do. ...			
663*a*	Gṛihavâstu	......	Vâstu ...	Do. ...	Do. ...	64	6	Do.
b	Nakshatravâstu ...	......	Do. ...	Do. ...	Do. ...			

APPENDIX.

EXTRACTS FROM MANUSCRIPTS.

No. 17.

Colophon :—

लक्ष्मीनृसिंहचरणांबुजलोलभृंग-
रामाख्यभूमिविबुधात्मजलक्ष्मणे[न*] ।
व्याख्या नळोदयकृतेर्लिखिता नळाब्दे
श्रीकृष्णभट्टरचितोत्तमगौतमेन ॥

No. 21.

Beginning :—

यच्चेतश्चंद्रचूडे ततपरिकलनाद्भृंगकीटायमानं
येनाकार्य्यप्पयाध्वर्युदितकुवलयानंदटिप्पण्यमोघा ।
यश्चंपूभारतायामतनुत[1] विवृते:[2] स्वाद्यगूढार्त्थसारां
व्युत्पित्सोर्दाशरूपीत्यवहदिह मुदं पद्धतिर्वा यदीय्या[3] ॥

[4]भ्रातुस्साहित्यकळां सांगोपांगामधीत्य गोपालात् ।
विश्वगुणादर्शं स व्याख्याति श्रीकुरविरामः ॥

No. 26.

Colophon :—

सौजन्यं सुमनोभिनंद्यममृतं सत्यं तु वेलातटं
स्वाचारस्सहजो महामधुरिमा धर्म्मस्सुराणां दृमः[5] ।
यत्राद्यः कुलदेवतापदमिति श्रीवेंकटेशो हरिः
सोयं सर्वमनोरमो विजयते पोंदूरिवंशार्णवः ॥

सुधांशुस्तत्र संभूतः सुब्रह्मण्यसुधीरिति ।
अजस्त्रपरिपूर्णाभिः कलाभिरुपशोभते[6] ॥

---

[1] No. 211 reads °भारतीया°.
[2] Read विवृतिं.
[3] Read यदीया.
[4] No. 211 reads ज्ञातु°.
[5] Read द्रुमः.
[6] No. 282 reads °शोभितः.

कुलशीलविवेकादिप्रशस्तगुणजन्मभूः ।
वेंकटांबा महाभागा जननी यस्य पावनी ॥
वेंकटेशाह्वयो यस्य पिता सज्जनपूजितः ।
पवित्रकीर्तिरत्यंतमहनीय्यगुणोज्वलः[1] ॥
तर्क्कादिप्रौढतंत्रप्रविततगहनप्रक्रियादुर्गमार्ग-
स्फूर्जत्स्वै[र*]प्रचारप्रबलमृदुगतिर्भूरिसद्ग्रंधबंधः[2] ।
काव्यालंकारजालप्रचुरपरिचयो यस्सुधासिंधुपूर-
प्रेंखत्कल्लोलजालप्रतिभटकलिता माधुरी साधुरीतिः ॥
तेन कृतैषा विदुषामभिनवषडशीतेर्भावबोधाय ।
[3]धम्मप्रदीपिकाख्या व्याख्या जीयादतीव विख्याता ॥

विजयाभ्युदयशालिवाहनशकवर्षंबुलु १[४]८४ चित्रभानु.

No. 33.

Beginning :—

मुकुंदाश्रमयोगींद्रपादपंकजमाश्रये ।
[4]यत्सुदर्शनमात्रेण प्रायत्यं जायते नृणां ॥
श्रीमत्कटाक्षेक्षणवीक्षितानां
वाणी सुवाणी रसनां च केवलां ।
प्रवर्तते तान् प्रणमामि नित्यं
श्रीकृष्णविद्वन्मणिदेशिकेंद्रान् ॥
अरुंधतीव व्रतभाग्यशालिनी
लक्ष्मीरभून्मे जननी जगन्नुता ।
श्रीरामभट्टस्तु पितामितागम-
स्तावद्य वंदामि[5] सादिष्टसिद्धये ॥
श्रीमद्राघवदैवज्ञवंश्यः श्रीकृष्णपंडितः ।
प्रकाशयाम्यहं स्पष्टं संध्यावंदनपद्धतिं ॥

---

[1] Read °महनीयगुणोज्ज्वलः.
[2] Read °सद्ग्रन्थ°.
[3] Read धर्म°.
[4] Read यत्संदर्शन°.
[5] No. 442 reads वंदे सकलेष्ट°.

No. 34.

Beginning :—

कालामृतस्य विद्यतिं . . राजाह्वयस्सुधीः ।
करोति बालबोधाय गौतमीतीरमास्थितः ॥

No. 44.

Colophon :—

एषा त्रैविद्यवृद्धेन तालवृंत्तनिवासिना ।
सोमपेन[1] कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

No. 45.

Beginning :—

आपस्तंबमुनिं वंदे मंदधीहितकाम्यया ।
योनुष्ठेयपदार्त्थानां क्रमकल्पमकल्पयत् ॥

यत्कृतं वेदवद्भाष्यमाद्रियंते विपश्चितः ।
स कपर्दिश्चिरं[2] जीयात् वेदवेदार्त्थतत्ववित् ॥

सुदर्शनार्यः कुरुते गृह्यतात्पर्य्यदर्शनं ।
केवलं वैदिकश्रद्धाप्रेरितो मंदधीरपि ॥

No. 50.

Beginning :—

नीलो[3] नाम महागिरिर्वसति तत्प्रांते समुद्रस्तयो-
र्मध्ये तिष्ठति नारिकेळकदळीपूगस्थली वाटिका ।
गीताकल्पफलान्युदारमधुना विश्राणयन् धीमतां
ब्रह्मानंदसरस्वती विजयते तस्यां तपोमंटपे[4] ॥

रामायणं तु व्याख्याय रामचंद्रसरस्वती ।
करोति गीताव्याख्यां समाख्येयां तत्वदीपिकां ॥

भाष्यं पैशाचकं दृष्ट्वा शंकरीयं च टिप्पणं ।
श्रीधरीयं समालोक्य लिख्यते पदयोजना ॥

---

[1] No. 154 reads कौशिकेन.

[2] No. 544*a* reads कपर्दी चिरं जीयाद्वेद°.

[3] Nîlagiri, 'the black mountain,' is a name of Jagannâtha (Purî) in Orissa. The synonym Sitêtaragiri occurs in verse 6 of the grant of Gâṇadêva; *Ind. Ant.* Vol. XX. p. 391.

[4] Read °मण्डपे.

No. 57.

Colophon :— श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्र्यंबकपादाब्जसेवापरायणेन उपनिषन्मार्गप्रवर्तकेन श्रीमाधवाचार्य्येण विरचिततात्पर्य्यदीपिकासहितायां सूतसंहितायां *etc.*

No. 58.

Beginning :—

भगवंतं भरद्वाजं प्रणम्य च कपर्दिनं ।
ब्रह्मज्ञो विदुषा[1] विष्णो भरद्वाजसमुद्भवः ॥
तत्समुदिष्पन्वयभवो यल्लुभट्टसुतस्सुधीः ।
महाव्रतोध्वरी ब्रह्मनिष्ठो यल्लाजिनामकः ॥
वक्ष्याम्यहं परेतस्य चाहिताग्नेर्द्विजन्मनः ।
भारद्वाजीय्यसूत्रस्य[2] पैतृमेधिकमंजसा ॥

No. 65.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानंदात्मसरस्वतीशिष्यश्रीशंकरानंदविरचिते *etc.*

No. 71.

Beginning :—

अर्चिर्षु[3] प्रार्थमानस्सित उदगयनं वत्सरो मातरिश्वा
मार्त्तण्डस्तारकेशस्तटदपि[4] वरुणामर्त्त्यनाथप्रजेशाः ।
आदिष्टा विश्वनेत्रा स्वयमतिवहने देवयानाध्वगानां
यः प्रोक्तो मानवाख्यस्स [5]तटिदधिपतिर्विश्रुतो मानवोपि ॥

Colophon :— इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविद्यातीर्थपूज्यपादशिष्यश्रीभारतीतीर्थमुनिप्रणीतायामधिकरणमालायां चतुर्थाध्यायस्स[6] चतुर्थः पादः.

No. 73.

Colophon :— इति श्रीगोडवर्त्तिवंश्येन काश्य . . . मानेन रामचंद्रशेखरपौंडरीकयाजिना विरचित आशौचसंग्रहस्संपूर्णः. In the beginning it is said that the author was the son of Veṅkaṭanârâyaṇa and Sâvitryambâ.

---

[1] No. 418 reads विदुषो विष्णुं. [2] Read °जीय°. [3] Read अर्चिःषु (?).
[4] Read °स्तडिदपि. [5] Read तडिद°. [6] Read °यस्य.

No. 76.

At the end of one of the *prakaraṇus*:— इति श्रीसद्गुरुशिवदेवलिंगादिव्यश्रीपादपद्माराधकश्रीमज्ज्योतिर्नाथविरचिते सकलश्रुतिस्मृतेतिहासपुराणागमसम्मते[1] शैवरत्नाकरे सदाचारप्रकरणः.[2]

No. 82.

Colophon :— इति श्रीसायणाचार्य्यविरचिते माधवीय्ये[3] वेदार्त्थप्रकाशे यजुस्संहितायां चतुर्थकांडे पंचमप्रश्ने एकादशोनुवाकः.

No. 87.

Beginning :—

पेजर्लमंचयार्याणां सुतः शिगयकोविदः ।
प्रयोगपंडितः प्राह मंत्रपूर्वक्रियोत्तरं ॥

No. 93.

Colophon :—

मन्वादिशास्त्रामृतसंचयालयः
श्रीकाळिदासाभिदधीरचंद्रमाः[4] ।
तेने सुधीसिंधुविवर्ध्यशौच-
ध्वांतांधलोकेक्षणशुद्धिचंद्रिकां ॥

No. 98.

Beginning :—

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तन्नौमि परमानंदं सच्चिदानंदविग्रहं ॥
यदन्तेवासिपंचास्यैर्निरस्ता भेदिवारणाः ।
तं प्रणौमि नृसिंहाख्यं यतींद्रं परमं गुरुं ॥

No. 100.

Beginning :—

यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत् ।
निर्म्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

---

[1] Read °स्मृतीतिहास°. [2] Read °प्रकरणम्. [3] Read माधवीये. [4] Read °भिध°.

यत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
अदिशन्माधवाचार्य्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥

Colophon:— इति श्रीमद्दिव्ययोगींद्रश्रीविद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरश्रीवीरबुक्कमहाराजस्याज्ञापरिपालकश्रीमाधवाचार्य्येण विरचिते वेदार्थप्रकाशे यजुस्संहितायां *etc.*

No. 103.

Colophon:— अस्मिन्नब्दे शालिवाहनशकाब्दाः १६८९ कल्यब्दाः ४८६८ प्रभवादिगताब्द[ा*]: २[०] यगु सर्वजितुनामसंवत्सर आश्वीज शु १२ द्विकैपयह्लिमराजु कोमारुडु वेंकटसुब्बय व्राश्न श्रीमद्रामायणं षट्कांडलु संपूर्णं.

No. 105*a*.

Colophon:— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविंदभगवत्पादपूज्यशिष्यश्रीमच्छंकरभगवत्पादकृता[1] वाजसनेयसंहितायां ईशावास्यमित्यादिमंत्राणां भाष्यं समाप्तं.

No. 112.

Week-day, *nakshatra*, &c. are given in this book for probably every event that occurred after Râma's leaving Ayôdhyâ till his return.

No. 116.

Beginning:—

नत्वा पितुः पदयुगं रघुनाथसूरेः
भक्त्या[2] प्रपद्य च पितामहमप्पयार्य्यं ।
आत्रेयवेंकटकविर्नवगद्यपद्यै-
रुज्जृंभते [3]फणितुमुत्तररामवृत्तं ॥

---

[1] Read °कृतौ. [2] Read °सूरेर्भक्त्या. [3] Read भणितु°.

No. 124.

Beginning :—

श्रीलक्ष्मीशं नमस्कृत्य भास्करं भारतीगुरुं ।
अहोबलार्यं पितरं गणेशं च मुहुर्मुहुः ॥
गोत्रेस्मिन् कौशिके जातो यनमंड्राब्धिचंद्रमाः ।
[1]नृशिंह्यसूरि[:*] कुरुते दैवज्ञानां सुभूषणं ॥

No. 131*a*.

Colophon :— इति श्रीब्रह्मयामळे ब्रह्मनारदसंवादे गायत्रीभुजंग्गं संपूर्णं.

No. 131*b*.

Colophon :— इति विश्वामित्रप्रोक्तं गायत्रीस्तवराजं (!) संपूर्णं.

No. 137.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यपरमशिवेंद्रसरस्वतीपादाब्जसेवाप(ा)रायणेन श्रीसदाशिवेंद्रसरस्वत्या विरचितायां ब्रह्मसूत्रवृत्तौ ब्रह्मतत्वप्रकाशिकायां *etc.*

No. 143.

Colophon :— इति श्रीमद्राजाधिराजप्रतापरुद्रदेवगजपतिपादारविंदषट्पदायमानमानसेन सकलविद्वज्जनचरणपरिचरणसंपादितप्रज्ञाविभवेन चतुरुचारश्वेतनागमयाभंडारधूर्तकर्तर्यादिविविधबिरुदविदितेन विश्वेश्वरमहाप्रसादितसुतेन कदंबेश्वराह्वयस्थानमहाप्रसादिना सूनृतवादिना विरचिते ज्योतिषसंहितार्णवे संक्रांतिनिरूपणं.

No. 145.

Colophon :— इति श्रीमत्सकलविशारदश्रीकेशवार्य्यभट्टोपाध्यायसूनुयाज्ञिकदेवण-[2]भटोपाध्यायविरचितायां स्मृतिचंद्रिकायां *etc.*

No. 148.

Colophon :— परमानंदघनब्रह्मानंदसरस्वतीविरचितस्मृतिरत्नमहोदधिः.

No. 152.

Beginning :—

[3]ग्रंधानालोक्य भाष्यादीन् गार्ग्यगोपालयज्वना ।
आपस्तंबनिबंधस्तु पितृमेधोनुवर्ण्यते ॥

---

[1] Read °नृसिंह°. [2] Read °भट्टो°. [3] Read ग्रन्था°.

No. 161.

Beginning :—

कर्म्मब्रह्म[।*]ध्वनीनस्य मंत्री भूपतिभूपतेः ।
व्याचष्टे [1]चौंड्रपाचार्य्यः सामिधेन्यादिसत्क्रियां ॥

No. 163.

Colophon :— इति श्रीपरमहं[स*]परिव्राजकाचार्य्यचिदानंदब्रह्मेंद्रसरस्वतीपाद-शिष्यपरमानंदघनविरचितायां भगवदापस्तंबसूत्रभाष्याद्यनुसारिण्यां प्रयोगरत्नावळी *etc.*

No. 184.

Beginning :—

यस्तर्कादिसमस्ततंत्रकमलव्रातप्रसादेष्विव
प्रत्यक्षप्रतिमः परः किरणवानन्वर्थगोवर्धनः ।
माद्यत्पंडितमंडलोद्भटरटद्वादींद्रबृंदाग्रणीः
श्रीरामांघ्रिनिषेवकस्समजनि श्रीमौनिगोवर्द्धनः ॥

रघुनाथपदारविंदसेवा-
वशतस्तस्य बभूव नंदनः ।
रघुनाथ [2]इतीड्यमानगम्यो
रघुनाथांघ्रिनिषेवकस्सुधीः ॥

बभूवुस्तस्य चत्वारस्तनया[ः*] सुनया बुधाः ।
महादेवाभिदः[3] श्रेष्ठो महाभाष्यसुभाषकः ॥

रामकृष्णो द्वितीयोसौ रामकृष्णांघ्रिसेवकः ।
तृतीयो जयकृष्णोस्मि श्रीकृष्णोगास्तनूद्भवः[4] ॥

श्रीमत्सिद्धांतकौमुद्याः स्वरवैदिकखंडयोः ।
नत्वा मुनित्रयं हृद्यां टीकां कुर्वे सुबोधिनीं ॥

No. 185.

Beginning :—

पाणिनिप्रकृतिशास्त्रकोविदान्
पावनानघ[5] गुरून् प्रणम्य तान् ।
पाणिनीयसमयानुसारिणी
वक्ष्यते स्वरमनोज्ञमंजरी ॥

---

[1] Read चौण्डपा°. [2] Read इतीड्यनाम°. [3] Read °भिधः.
[4] Read श्रीकृष्णाम्बातनूद्भवः (?). [5] Read °नथ.

स्वभ्यस्तवेदः कुरुते प्रबंधं
स्वरार्थमावर्त्तितशब्दविद्यः ।
रुद्रार्य्यसूनुर्नरसिंहसूरि-
रसावदोषो विदुषां मुदेस्तु ॥

No. 191.

Colophon :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीविश्व-दिद्याजिश्रीरंगयाजिसूरिवरसूनोः[1] अप्पयदीक्षितस्य कृतिर्ब्रह्मतर्कस्तवः सव्याख्यानस्स-मात्पः.

No. 192.

Colophon :— इति श्रीमदखिलपरिवारदक्षिणामूर्त्तिकिंकरेण लक्ष्मणसूरिणा विर-चितायां षड्भाषाचंद्रिकायां अपभ्रंशभाषानिरूपणं संपूर्णं.

No. 205.

Colophon :— इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजजानकीजानिर-घुनाथभट्टात्मजश्रीकृष्णपंडितकृतस्फोटचंद्रिका समाप्ता.

No. 213.

Beginning :—

प्रणिपत्य महादेवं हरदत्तेन धीमता ।
धर्म्माख्यप्रश्नयोरेषा क्रियते वृत्तिरुज्वला[2] ॥

Colophon :— इति हरदत्तमिश्रविरचितायां धर्म्मव्याख्यायां उज्वलायां[3] द्वितीय्यः प्रश्नस्समाप्तः एकादशः पटलः.

No. 220.

Colophon :— इति श्रीमत्स्वयंप्रकाशानंदसरस्वतीचरणारविंदसंलग्नरजोभूतस्य अ-च्युतकृष्णानंदतीर्थस्य कृतौ तैत्तिरीयकभाष्यवाख्यायां[4] वनमालाख्यायां भृगुवल्लीभाष्यव्या-ख्या समाप्ता.

---

[1] Read °विश्वजिद्याजि°. [2] Read °रुज्ज्वला. [3] Read उज्ज्वलायां द्वितीयः.
[4] Read °व्याख्यायां.

No. 228.

Colophon :—

खवेदमुखशीतांशुमित [1]आनंदनामके ।
वत्सरे कार्त्तिके मासि सितपक्षमनोरमे ॥
पक्षतौ च तिथौ भानावविमुक्तनिवासिना ।
पायगुंडोपाख्यवैद्यनाथेन रचिता शुभा ॥
शब्दकौस्तुभसुव्याख्या प्रभाख्या विदुषां मुदे ।

No. 237.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमदानंदपूज्यशिष्यभगवदानं दगिरिकृतायां श्रीमच्छंकराचार्य्यकृतभगवद्गीताभाष्यटीकायामष्टादशोध्यायः.

No. 238.

This work is generally called *Vaiyâkaraṇasiddhântabhûshaṇa*; see Dr. Aufrecht's *Cat. Cat.* p. 614*a*.

No. 239.

Colophon :— श्रीमत्परमहंसपरिव्राजकाचार्य्यस्वयंप्रकाशानंदस्वामिशिष्यरामचंद्रा नंदसरस्वतीविरचिते सुंदरकांडटीकाशिरोमणौ अष्टषष्टितमस्सर्गः.

No. 241.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्कृष्णानंदभारतीमुनिवर्य शिष्यब्रह्मानंदभारतीकृत एकादशस्कंधसारसंग्रहः सव्याख्यानस्समाप्तः. This work is connected with the 11th skandha of the *Bhâgavatapurâṇa*; see Dr. Aufrecht's *Cat. Cat.* p. 403*a*.

No. 242*b*.

Colophon :— इति श्रीहयग्रीवानुग्रहसमग्रकवितावैभवेटकेलकुलमंडितलक्ष्मीदेव्य नंतपंडिततनूभवश्रीमदानंदतीर्थगुरुकरुणालब्धवैष्णवकलावितानकृष्णसूरिविरचितायां न ळोदयव्याख्यायां कुंदवल्लीसमाख्यायां चतुर्थस्सर्गः.

No. 245*c*.

Colophon :— इति श्रीमहोपाध्या[या]द्वैतविद्याचार्य्यस्य श्रीराघवसोमयाजिकुलाव तंसस्य श्रीतिरुमलाचार्य्यवर्य्यस्य सूनोरन्नंभट्टस्य कृतौ श्रीमहाभाष्यप्रदीपो[द्*]द्योतने षष्ठस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकं.

---

[1] This date is corrupt.

No. 251.

Beginning :—

लक्ष्मीनृसिंहनामाहं परिभाषेंदुशेखरे ।
करिष्ये त्रिशिखाभिख्यां व्याख्यां संख्यावतां मुदे ॥

No. 255*b*.

Beginning :—

संध्यावंदनमंत्राणां वेदभाष्यानुसारतः ।
क्रियते बालबोधार्त्थं भाष्यं तिर्मलयज्वना ॥

No. 259.

Beginning :—

विद्यारण्यं भजे ह्याद्यं सद्योविद्योत्थतापहं ।
यत्संदर्शितमार्गेण गंतुं मंददृशोप्यलं ॥

श्रीरामं गुरुमानम्य संप्रदायानुसारतः ।
तैत्तिरीयोपनिषदस्तन्यते लघुदीपिका ॥

Colophon :—

विद्यारण्यकृतं [1] वाख्यादुग्धाब्धिं पातुमक्षमाः ।
तस्मादुद्धतं [2] सारं तृप्तिदं ते पिबंत्वमुं ॥

रविवंशार्णवोद्भूतः श्रीरामाभिधसन्मणिः ।
कृत्यानया प्रसन्नस्सन् हार्दं हरतु मे तमः ॥

इ[ति] वारुण्युपनिषल्लघुदीपिकायां भृगुवल्ल्याख्यस्तृतीयोनुवाकः.

No. 265.

Beginning :—

पाणिग्रहे पांड्यकुमारिकायाः
पायात्समीकं परमेश्वरेण ।
अन्योन्यलाभाच्छिवयोर्विचित्रं
यस्मिन् [3] जयोभूदुभयोस्समानः ॥

. . . .

सूक्ष्मार्त्थं ग्राहयतां मंदानपि नाटकं मृदूपायः ।
तस्यापि जीवितमिदं प्राकृतमप्राकृतेन यन्मिश्रं ॥

---

[1] Read व्याख्या°.   [2] Read तस्मात्समुद्धृतं.   [3] Read यस्मिञ्जयो.

ये त्रिविक्रमदेवेन हेमचंद्रेण चेरिताः ।
लक्ष्मीधरेण ये ग्रंथा(:) भोजेन च महीक्षिता ॥
ये पुष्पवननाथेन ये वा वाररुचा अपि ।
वार्त्तिकार्णवभाष्याद्या अप्पयज्वकृताश्च ये ॥
ते विस्तृतत्वात्प्रायेण संक्षेपरुचिभिर्जनैः ।
अगृहीता विळंबंते संध्यार्ककिरणा इव ॥
अतः प्राकृतशब्दानामंधे तमसि मज्जतां ।
प्रकाशनाय क्रियते संक्षिप्ता मणिदीपिका ॥

Colophon:— इति श्रीदक्षिणसमुद्राधीश्वरचोक्कनाथभूपालप्रियसचिवसज्जनावलंबन ब्रह्मण्यबिरुदांकनलबोम्मभूपालविमलकुलकलशाब्धिपूर्णचंद्राय(य)माणनिजविमलचरित्रनिर्जितारुंधतीपातिव्रत्य[धौरंधरीक]चिन्नमांबा[गर्भ]शुक्तिमुक्ताफलसंततपरितोषितसकलविद्वत्कविसहवासमात्रलब्धसमस्तविद्यावैशद्यचिनबोम्मभूपालविरचितायां प्राकृतमणिदीपिकाय अपभ्रंशप्रकरणं समाप्तश्च ग्रंथः.

No. 267*c*.

Colophon:— इति श्रीवीरनारायणसकलविद्याविशारदकोमटिवेमभूपालविरचित-शृंगारदीपिका समाप्ता.

No. 271.

Compare *Chidvallikâ* and *Kâmakalâvilâsaṭîkâ* by Naṭanânandanâtha in Dr. Aufrecht's *Cat. Cat.* p. 275*a*.

No. 273*b*.

Beginning:—

संवित्सिद्धांतासिद्धार्थसारसंग्रहरूपिणीं ।
पंचाशिकां विरूपाक्षप्रोक्तां व्याकुर्महे वयं ॥

इह विश्वानुग्रहैकरसिकः श्रीमान् परमशिवभट्टारकः परिगृहीतलीलाविग्रहः श्रीविरूपाक्षनाथपादनाम्ना परिभ्रमन् *etc.*

No. 282.

The four opening verses are the same as in No. 26.

No. 284.

Colophon :—

चक्राह्वयधरः श्रीमान् माधवार्य्योकरोन्मुदा ।
पूर्वाचार्य्यकृतग्रंधभाष्यं[1] तस्मै नमो नमः ॥

. . . . सुदर्शनविषयषड्विंशतेश्च पद्यानां संभूय शतसंख्याकानां संघैः कूरनारायणेन सर्वचूडामणिना महानुभावेन विरचितमिदं सौदर्शनं स्तोत्रं यः पठति *etc.* This work is also called *Sudarśanaśataka*; see Dr. Aufrecht's *Cat. Cat.* p. 724*b*.

No. 291.

The poet first invokes the feet of Brahmânanda Sarasvatî, who lived in the *âśrama* between Nîlâdri and the sea (see page 59, note 3). Then he praises Vyâsa and other *Ṛishis*; then Gauḍapâda, Gôvinda, Śaṁkara, Surêśvara, Tôṭaka, Hastâmalaka, Pûrṇânanda Sarasvatî, Purushôttamayôgin, Śivarâma Sarasvatî (यस्मै प्रसन्ना कामाक्षी क्षीरान्नं कृपया ददौ। लब्धापद्रानं तं नौमि शिवरामसरस्वतीं ॥), Gôpâlânanda, Svayaṁprakâśa and Brahmânanda Sarasvatî.

No. 293*a*.

Colophon :— इति शिवराममुनींद्रपादशिष्यभास्करसूरिविरचिते वर्णितशिवमोहिनीविलासे द्वादशोयं सर्गः.

No. 293*b*.

Colophon :—

वीरराजवरेण्यनंदननंजराजविनिर्मितं ।
चारुगीतमिदं . . परिशोधयंतु सुधायितं ॥

No. 295.

Colophon :— श्रीमन्महाकुलप्रसूतस्य श्रीवत्सगोत्रस्य सकलविद्वज्जनमकुटालंकारहीरस्य जगन्नाथभट्टारकपौत्रस्य काव्यनाटकालंकारसर्वज्ञस्य पदवाक्यप्रमाणज्ञस्य वेंकटाद्रिभट्टारकपुत्रस्य श्रीरामेंद्रसरस्वतीचरणारविंदसेवातत्परस्य श्रीमदनगोपालमंत्रचिंतनापरस्य[2] शब्दशास्त्रविशारदस्य सकलकलाप्रवीणस्य आश्रितजनरक्षणदक्षस्य तिरुमलभट्टारकस्य पुत्रेण भवभूतिना विराचितोत्तरचरितं नाम नाटकं समाप्तिमगमत्. This is some modern Bhavabhûti, who felt it his duty to write an *Uttaracharita*, in imitation of the *Uttararâmacharita* of his great namesake.

---

[1] Read °चार्यकृतग्रन्थ°. [2] Read °चिन्तना°.

No. 297.

Tripurâri of Benares;
m. Pârvatî.
|
Dharma;
m. Nâgâmbikâ.
|
Nârâyaṇa. — Parvatêśa; m. Mallamâmbâ. — Râma.
|
Dharmasûri;
author of the *Sâhityaratnâkara.*

No. 298.

Colophon:— इति श्रीवंगळकामयभट्टोपाध्यायसूनुलिंगयसूरिविरचितायाममरकोशपदविवृतौ वारिवर्गः.

No. 299.

Colophon:—

छंदोज्ञानमिदं भवाद्भगवतो लेभे सुराणां गुरुः[1]
तस्माद्दुश्च्यवनस्ततस्सुरगुरुः[2] मांडव्यनामा ततः ।
मांडव्यादपि सैतवस्तत ऋषिर्यास्करततः[3] पिंगळः
तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात् ॥
इति साहित्याय गिरां स्त्रीणामिव यादवप्रकाशेन ।
कविदयितानां पिंगळशास्त्राद्वृत्तविधिरुपजह्रे ॥

No. 301.

Colophon:—

श्रीमच्छंकरसंहिताशिवरहस्यादिप्रसिद्धात्मनां
नाम्नामष्टशतस्य साष्टकशतश्लोक्या निरुक्तिं व्यधात् ।
श्रीभारत्युपनामभास्करकृती तां विस्तराद्दुस्तरां
व्याचख्ये पटु वेंकटाचलपतिः काशीपतिप्रीतये ॥
शिवनामकल्पवल्ल्या भास्करकविरालवालमाबध्नात् ।
श्रीमद्वेंकटाचलसुधीस्सुधाभिरापूरयामास ॥

No. 305.

Colophon:— इति श्रीवनान्वयेन नृसिंहवरसूनुना ब्रह्मविद्यादीक्षितेन विरचितवाल्मीकीय्यविरोधभंजनी[4] परिपूर्णा.

---

[1] Read गुरुस्तस्मा°. [2] Read °गुरुर्माण्डव्य°. [3] Read ऋषिर्यास्कस्ततः पिङ्गलस्तस्येदं.
[4] Read °वाल्मीकीय°.

No. 313.

Beginning :—

श्रीवत्सगोत्रेण ब्रह्मभट्टात्मजेन शब्दविदा ।
त्रिपदद्योतिन्याख्या क्रियते कृतिरेङ्गमाधवार्य्येण ॥
वीरप्रतापवेंकटदेवमहारायपंडितेष्वेकः ।
अहमेङ्गमाधवार्य्यो लिखाम्यहं बालबोधाय ॥

No. 317.

Colophon :— इति हारीतकुलतिलकस्य सरस्वतीवल्लभापरनामधेयस्य [1] वेंकटनाथस्य वैदिकसार्वभौमस्य कृतिषु स्मृतिरत्नाकरो नाम सदाचारसंग्रहस्समाप्तः. (6,000 verses.)

सुब्रह्मण्यतनूजेन सदा पंडितसेविना ।
पार्वतीश्वरवर्येण लिखितोतिविवेकदः ॥
स्मृतिरत्नाकरो नाम सतामाचारसंग्रहः ।
गुणाष्टाष्टमिते [2] १६८३ शाके वृषाब्दे माघमासि वै ॥

No. 319.

Colophon :— इति श्रीषोडशनित्यातंत्रेषु श्रीकादिमताख्यपरिपूर्णस्य तंत्रस्य प्रपंचनारसिंहराजप्रकाशाभिधानेन सुभगानंदनाथेन विरचितायां मनोरमाख्यायां व्याख्यायां त्वरितानित्याविद्याभिधानप्रकाशनपरं चतुर्दशं पटलं परिपूर्णं परामृष्टं.

No. 320.

Beginning :—

अभिनवपदपूर्वः काळिदासः प्रगल्भ-
स्त्रिनयनदयितायाः प्रेमडिंभस्तृतीयः ।
विरचयति तयैव प्रेरितः प्रेमपूर्वं
हरिगुणपरिणद्धं चारुचंपूप्रबंधं ॥

---

[1] The same name had been borne by Veṅkaṭanâtha's grandfather ; see No. 603.

[2] Read °ष्टाष्टिमिते.

No. 323.

In the *prastâvanâ* :—

विख्यातोजनि पर्वतेश्वरसुधीः श्रीवारणास्यन्वये
षण्णां दर्शनकारिणां सुमनसामैकात्म्यलीलायितं ।
धर्माख्येन मनीषिणा विरचि[त*]स्तत्सूनुना तादृशा
व्यायोगो रसजृंभितोस्ति नरकध्वंसाभिधो नूतनं ॥

The poet seems to have been a devotee of Jagannâtha in Orissa, since in the beginning he praises Vishṇu as seated between the sea and the Nîlâdri; see page 59, note 3.

No. 325.

Beginning :—

ग्रंथाति[1] रम्यां नानार्थरत्नमालां गुणोज्वलां[2] ।
भास्करः कृतिनां मान्योन्नात्यल्पं[3] नातिविस्तरं ॥
. . चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितैः ।
संकीर्णाव्ययकांडाभ्यामिति षड्भिरनुक्रमात् ॥

Colophon :—

इति जगदुपकारिण्यां भास्करविबुधेन संगृहीतायां ।
अव्ययपदकांडोयं पूर्णो नानार्थरत्नमालायां ॥

No. 327.

Beginning :—

टीका ज्योतिषशास्त्रतत्वमखिलं संगृह्य संभाष्यते
श्रीमद्वेंकटयज्वना बुधमुदे कालामृतस्योज्ज्वला ॥
श्रीमच्चितलपाटिवंशमहितः श्रीवेंकटाख्यो महान्
शांतश्शंकरकिंकरश्च सुषुवे श्री[चं]नमांबा च यं ।
यस्योदग्रतपोधनाः श्रुतिविदः श्रीयल्लयज्वादय-
श्चत्वारस्सुसहोदराः शुचिधियः श्रीरुद्रसंजापकाः ॥

---

[1] Read ग्रश्नाति. [2] Read गुणोज्ज्वलाम्. [3] Read मान्यो नात्यल्पां नातिविस्तराम्.

वेदं याजुषमंगसंगतमसौ योजीगणछीलया
मन्वादिष्वपि धर्मशास्त्रनिचयेष्वेकाधिपत्यं गतः ।
ज्योतिश्शास्त्रसुधारसं कबळयन् श्रौतादिकी (?) जागरी-
त्सोयं वेंकटयाजको विजयते श्रीकुंडिनीपट्टणे ॥

No. 330.

Colophon :—

इत्थं विद्याविलासोयं श्रीशिवात्प्रथितो भुवि ।
भवताच्छिवयोः प्रीत्यै स्वडिंभस्येव भाषितं ॥
श्रीशंकरेंद्रशिष्येण वासुदेवेंद्रयोगिना ।
रचिते श्रीविलासेयमुल्लासस्सप्तमोभवत् ॥

No. 333.

Colophon :—इति श्रीमल्लोल्लकुलसंप्रदायप्रवर्तकश्श्रमरांबिकाप्रसादसमुल्लसितमहासारस्वतभट्टः लोल्लग्रंथविवरणकर्त्ता श्रीमहोपाध्यायमहादेवाचार्य्यसत्तमेन[1] साहित्य[ा*]तीतकल्पतरुप्रबंधलक्ष्मीधरार्यषष्ठेन [2]विरिचिमिश्रपंचमेन पुरुषोत्तममहोपाध्यायनप्त्रा लक्ष्मणार्य्यपौत्रेण विद्वत्सार्वभौमनूतनव्यासादिबिरुदांकितविश्वनाथभट्टारकतनयेन पार्वतीगर्भमुक्तामणिना अनेकप्रबंधकर्त्रा लक्ष्मीधरदेशिकेन कृता लक्ष्मीधराख्या सौंदर्यलहरीव्याख्या । अनया संतुष्टा भवानी.

No. 335.

Beginning :—

आगंभीरविपश्चितः पितुरभूद्यः कोनमांबोदरे
विद्याष्टादश तस्य मर्मभिरभूद्य[ः*] श्रीनृसिंहाद्गुरोः ।
यस्य श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोभव-
त्स त्रेतात्रिमरत्रयी वितनुते तामेव नाथत्रयीं ॥

गुरुचरणसनाथो भासुरानंदनाथः
विवृतिमतिरहस्यां वीरवृंदैर्नमस्यां ।
रचयति ललिताया नामसाहस्त्रिकाया
गुरुकृतपरिभाषा[ः*] संविदर्णवन्नशेषाः ॥

---

[1] Read °सप्तमेन. [2] Read विरिञ्चि°.

The corrupt words in these two verses can be corrected with the help of Dr. R. Mitra's *Notices*, No. 2287.

No. 338.

Beginning :—

श्रीनाथादित्रयं नत्वा गंभीररायसूरिसुतः ।
नाथनवरत्नमालागूढार्थव्याकृतिं तनुते ॥

No. 344.

Colophon :—

व्याख्यानं प्रातिशाख्यस्य वीक्ष्य वाररुचादिकं ।
कृतं त्रिभाष्यरत्नं यद्भासते भूसुरप्रियं ॥

No. 346.

Colophon :—

श्रीवत्सगोत्रतिलकं जगद्वैत्यपितामहं ।
अमरेश्वरभट्टस्य प्रियसूनुं गुणोन्नतं ॥
वल्लभेंद्रेण रचितं जनानां हितकारणं ।
वैद्यचिंतामणिर्नाम भैषज्यं ग्रंथमुत्तमं ॥

These two verses are as ungrammatical as in Dr. Burnell's *Tanjore Catalogue*, p. 68*b*.

No. 350.

Colophon :— इति श्रीमत्परमयोगींद्रपुण्यानंदनाथशिष्यामृतानंदयोगींद्रविरचितायां योगिनीहृदयदीपिकायां पूजासंकेतः.

No. 354.

Beginning :—

आचार्य्यश्रीपतिकृते जातके कर्म्मपद्धतिः ।
व्याख्यायते मया स्पष्टं सूर्य्यदेवेन यज्वना ॥
पश्यंतु तमिमं ग्रंथं शास्त्रन्यायोपबृंहितं ।
पूर्णं जातकशास्त्राणामलंकारं विपश्चितः ॥

Colophon :—

इत्थं [1] निधृवगोत्रेण सूर्य्यदेवेन यज्वना ।
कृतो जातकपद्धत्यां संकीर्णफलनिर्णयः ॥

---

[1] Read निध्रुव°.

इति श्रीसूर्य्यदेवसोमसुद्विरचिते श्रीपद्धतिव्याख्याने जातकालंकारे प्रकीर्णकाध्यायोष्टमः ॥

श्रीमच्छ्रीपतिनामधेयसुधिया शिष्यासुनीतेन[1] या
प्रोक्ता जातककर्म्मपद्धतिरहो गूढार्थनध्याकृतिः[2] ।
सैषा भास्करसूरिणा सुमनसां पादाब्जसंसेविना
व्याख्यात[ा*] प्रतिवादिनागदळनव्यापारनागांतकः[3] ॥

No. 357.

Beginning :—

या होरा रचिता वराहमिहिराचार्य्येण नानार्थिनी
तस्या मद्गुरुदेवताननसरोजस्य प्रसादागतं ।
एका[र्थं] परिगृह्य तस्य रचये टीका[4] सुबोधार्त्थिनी-
मुदृङ्मण्डधियामनुग्रहनृपे[5] लोकोपकाराय च ॥

No. 360.

Beginning :—

रविळ्ळवेंकटबुधः प्रथितानुभावान्
वाणीविनायकगुरून् प्रणिपत्य मूर्ध्ना ।
श्रीचेन्नुभट्टकृतिभासुरतर्क्कभाषा-
भावं प्रकाशयति बालविबोधहेतोः ॥

No. 367.

Colophon :— इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधे[:*] श्रीशैलगुरोस्सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा लिखितायां श्रीमद्भागवतचंद्रचंद्रिकायां द्वितीयस्कंधे दशमोध्यायः.

No. 371.

Colophon :— श्रीमत्सकलगुण . . . . कृष्णातुंगभद्रामध्याधिष्ठितबोरुवेल्लिनगरविहरमाणश्रीकेशवस्वामि . . . . सोमभूमिपतिसतीललामगिरियमांबागर्भ . . . . [6]सुधाकरायमानश्रीवेंकटक्षमाभृन्महास्थानविद्वन्महाकविना कौशिक(स)गोत्रतिलकेन श्रीमदायलूर्यन्वयसमुद्भवेन कंदाळयार्येण विरचितेलंकारशिरोभूषणनामन्यलंकारशास्त्रे द्वितीयोध्यायः.

---

[1] Read शिष्यानुनीतेन.
[2] Read °निध्याकृतिः.
[3] Read °नागारिणा (?).
[4] Read टीकां.
[5] Read °मृदृङ्नन्दाधियामनुग्रहकृते.
[6] Read °रायमाण°.

No. 372.

Colophon :— इति कवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य वेदां[ता*]चार्य्यस्य कृतिषु स्तोत्रभाष्यं संपूर्णं.

No. 375.

Beginning :—

येन भागवती टीका पंचटीकातिशायिनी ।
कृता वाचस्पतिन्यायाः पद्यैष्षष्ट्या विवेचिताः ॥
भ(ा)ट्टप्रभाकरार्थेषु रचिता पादमूलिका ।
द्वैताद्वैतविवेकश्च नानावृत्तैर्विभावितः ॥
संप्रदायार्थतश्शास्त्रदीपिका व्याकृतामुना ।
वनेनृसिंहजब्रह्मविद्याध्वरिविपश्चिता ॥
विरोधभंजनी व्याख्या वाल्मीकीये विरच्यते ।

Colophon :—

नृसिंहो जनको यस्य भवानी जननी स्वयं ।
अहोबलान्मंत्रसिद्धेब्रह्मविद्यात्मनः[1] पितुः ॥
ब्रह्मविद्याध्वरींद्रेण वाल्मीकीये कृतोमुना[2] ।
विरोधभंजनी व्याख्या जीयादाचंद्रतारकं ॥

No. 378.

Colophon :— इति श्रीमदात्रेयगोत्रकलशोदधिसुधाकरश्रीकृष्णसूरिचरणारविंदमि-ळिंदायमानमानसेन तत्पौत्रेण श्रीनिवासदासेन प्रकाशितायां वेदांतसिद्धांतकौमुद्यां ईश्वर-परिच्छेदः तृतीय्यः[3] ॥ वेदांतसिद्धांतकौमुदी समाप्ता.

No. 383.

Beginning :—

आचार्य्यं शठगोपदेशिकवरं [4]प्राचाय्यपारंपरी-
मप्यानम्य सनारदं कुशलवाचार्य्यं मुनीनां वरं ।
पूर्वाचार्य्यकतो[5] विलोक्य बहुधा व्याख्यास्यतां[6] प्रीतये
कुर्वे संप्रति युद्धकांडविवृतिं श्रीमत्किरीटाभिधां ॥

---

[1] Read °सिद्धिर्ब्रह्म°.
[2] Read कृतामुना.
[3] Read तृतीयः.
[4] Read प्राचार्य°.
[5] Read °कृता.
[6] Read व्याख्यास्यतां.

No. 385.

Beginning :— In the town of Madhurâ—

श्रीमज्जक्कुलवेंकटेंद्रतनयः श्रीवीरमांबातप-
स्साफल्यैकफलोदयः स्थिरदयापांगांतरंगाश्रयः ।
गोत्राधूर्वहदोर्विधूतफणिराड्गोपालरायक्ष्मा-
पालः पालयिता समस्तजगतां प्रज्ञानिधिर्वर्त्तते ॥

. . . .

श्रीरामचंद्रोदयमुख्यपद्यकाव्यात्मना संप्रति येन गुंभिताः[1] ।
प्रौढोक्तिमुक्तालतिकास्सुदृक्कतेः कंठस्थलीषु प्रतिभांति संततं ॥

. . . भाणमेकं न्यभाणीत् ॥

शृंगारमंजरीनाम्ना स भाणः प्रथितो भुवि ।
सारशृंगारनिष्यंदस्साक्षाद्यत्र पदे पदे ॥

No. 386.

Colophon :—

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृंभयत भाष्यकृतामुदारः ।
वामागमाद्भगवत . . . . . .
रामानुजस्स मुनिराद्रियतां मदुक्तिं ॥

इति श्रीरंगरामानुजमुनेः कृतिषु भाष्योपयुक्तोपनिषद्वाक्यविवरणं समाप्तं.

No. 391.

Colophon :—

इत्थं श्रीमच्छठारेश्चरणसरसिजद्वंद्वसेवानिघाता-
. . . शेशमोहानिरुपमधिषणो कौशिकानां कुलेंदुः ।
गोविंदार्यौनिवार्य्यप्रतिकथकगजस्तोमपंचास्यरूप-
ष्टीकां पीतांबराख्यां व्यतनुत विपुलां साधु साकेतकांडे ॥

इति श्रीकौशिकगोविंदराजविरचिते श्रीरामायणव्याख्याने पीतांबराख्या[2] अयोध्या-
कांडस्समाप्तः.

---

[1] Read गुम्फिताः.

[2] Read °राख्ये.

No. 392.

Colophon :— इति कवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंक[टनाथस्य] वेदांताचार्य्यस्य कृतिषु श्रीरंगनाथपादुकासहस्रे *etc.*

No. 396.

Colophon :— इत्यात्रेयवादिहंसांबुधा . . . . . . वंशावतंसकविविद्वन्मणिवाजपेयपृष्ठाप्तोर्यामादियाज्यप्पयाचार्यतनूभवस्य[1] आशुश्लेषयमक[स]कलविद्वच्चक्रवर्त्तिरघुना[था]चार्य्यदीक्षितसूनोः सीतांबागर्भशुक्तिमुक्ताफलस्य श्रीनिवासकृपाविदितनयस्य कविविद्वन्मणेः कांचीनगरवास्तव्यस्य श्रीमदर्शाणि . . . . . पालवेंकटाचार्य्ययज्वनः कृतिषु लक्ष्मीसहस्रे प्रपदनस्तबकः पंचविंशः.

No. 405*a*.

Colophon :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितेन[2] कृतं श्रीरामायणसारसंग्रहस्तोत्रविवरणं संपूर्णं.

No. 405*b*.

Colophon : — इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितेन[2] कृतं भारतसारसंग्रहपरमाशिवस्तोत्रविवरणं संपूर्णं.

This work is also called *Bhâratatâtparyasaṁgraha*; see Dr. Burnell's *Tanjore Catalogue*, p. 184*b*.

No. 407.

Colophon :—

श्रीधरानंदपादाब्जरज[:*]श्रीधारिणाधुना ।
श्रीधरस्वामियतिना कृता टीका सुबोधिनी ॥

इति श्रीभगवद्गीताटीकायां सुबोधिन्यां श्रीधरस्वामिकृतौ परमार्थनिर्णय . . . अष्टादशोध्यायः.

No. 408.

Beginning :— आश्वलायनसूत्रस्य देवस्वाम्यादिव्याख्यानुसारेण प्रयोगवृत्तिः क्रियते. This is the same beginning as in Dr. R. Mitra's *Notices*, No. 827.

---

[1] Read पौत्रस्य for तनूभवस्य. [2] Read °सूनुनाप्पय°.

No. 410*a*.

Colophon :— इति श्रीदक्षिणामूर्त्तिदेवश्रीपादोपदिष्टायां पदवर्णसंख्यायां देवश्रीर्नाम अष्टकाष्टकं[1] संपूर्ण.

No. 413.

Colophon :— कामकायनविश्वामित्रगोत्रान्वयेन चिंदुकूरुवास्तव्यपुराणतिरुमलयज्वनंदनेन तिरुमलसोमयाजिना विरचिता शुभकर्मस्मार्त्तप्रदीपिका स्मार्तानां मुदेस्तु.

No. 414*a*.

At the end of a *paṭala* :— इति कौशिकरामेणाग्निचिता कृतायामापस्तंबधूर्तस्वामिभाष्यकृतौ[2] नवमप्रश्ने पंचमः पटलः.

No. 414*b*.

Colophon :— इति परिभाषापटलस्य गुहदेवस्वामिविरचितं भाष्यं सकलशाखाभिमतं संपूर्ण ॥

आपस्तंबमुनिं वंदे वेदार्थैकपरायणं ।
तत्प्रसादान्ममाद्यैव सान्निध्या[3] श्रुतिराशयः ॥

No. 418.

Beginning :—

प्रणम्य विदुषो विष्णुं भारद्वाजसमुद्भवः ।
तलमुदिप्पन्वयभुवो[4] यज्ञभट्टसुतस्सुधीः ।
महाव्रताध्वरी ब्रह्मनिष्ठो यज्ञाजि(म)नामकः ॥
वक्ष्याम्यहं परेतस्य आहिताग्नेर्द्विजन्मनः ।
आश्वलायनसूत्रस्य पैतृमेधकमंजसा[5] ॥

No. 424.

Colophon :— इति श्रीगजपतिगौडेश्वरनवकोटिकर्णाटकलुबरिगेश्वरजमुनापुराधीश्वरहुतवशाहिसंत्राणशरणरक्षणश्रीदुर्गावरपुत्रपरमपवित्रचरित्रराजाधिराजपरमेश्वरश्रीप्रतापरुद्रदेवमहारायविरचिते स्मृतिसंग्रहे सरस्वतीविलासे व्यवहारकांडे प्रकीर्ण[का]ख्यस्य पदस्य विलासः.

---

[1] Read अष्टमाष्टकं. [2] Read °वृत्तौ. [3] Read सांनिध्ये. [4] Read °भवो. [5] Read °मेधिक°.

No. 434.

Beginning :—

मोमेशादीन् प्रणम्यादौ जगन्नाथेन सद्गुरून्
ऋचां वर्णक्रमज्ञानव्याख्यानं तन्यतेधुना ॥

No. 439.

Colophon :— इति पार्षदव्याख्यायामानंदपुरवास्तव्यवज्रटपुत्रउव्वटकृतौ प्रातिशाख्यभाष्ये अष्टादशं पटलं समाप्तं.

No. 440.

Beginning :—

पुरुषोत्तमभट्टेन देवराजस्य सूनुना ।
अग्निष्टोमक्रतोः क्लृप्तिस्सुस्पष्टं क्रियतेधुना ॥

No. 442.

Beginning :—

भाष्याणि वेदस्य विलोक्य निर्मिता
विद्वत्प्रिया निर्णयकल्पवल्ल्यसौ ।
संशोभिगंभीरपदानुगुंभिता [1]
प्राप्तागमश्रेणिशुशुत्सयाद्य ॥

Colophon :—

श्रीकृष्णांबुजराजराजविमतः श्रीरामविद्वन्मणिः
श्रीलक्ष्मीरपि यं जबान [2] तनयं गौरीशपादानतं ।
स न्यग्रोधसमीपवासिभगवन्मंत्रानुचिंताफले
संध्यावंदननिर्णये निरगमद्गुच्छश्चतुर्थोधुना ॥

No. 462.

Beginning :—

वात्स्यश्रीशठगोपदेशिकवरश्रीपादरेण्वंजनै-
र्दृष्टा [3] निर्म्मलया निरीक्ष्य बहुधा वल्मीकजन्माशयं ।
श्रीमत्कौशिकवंशसागरमणिर्गोविंदराजाह्वयो
व्याचक्षेहमरण्यकांडमधुना पश्यंतु निर्मत्सराः ॥

---

[1] Read °गुम्फिता [2] Read जजान. [3] Read °र्दृष्ट्या.

No. 464.

Colophon :—

यतिराजमुनींद्रेण श्रीभूतपुरवासिना ।
मूलमंत्रार्थसारोयं लिखितः प्राग्गुरूक्तिभिः ॥

No. 465.

Beginning :—

सांबं शिवं नमस्कृत्य तर्कसंग्रहदीपिका ।
गौडेशालकुलोत्पन्नमुकुंदेन वितन्यते ॥

No. 469.

Colophon :— इति श्रीरामचंद्रचरणारविंदमरंदास्वादतुंदिलमनोमिळिंदेन समस्तविद्वज्जनजेगीयमाननिरवद्यनिखिलविद्याविशारदेन दशदिशासीमंतिनीमुक्ताकला[पा*]यमानयशःकलापेन श्रीमज्जनं . छीम्मडिवेंकटेंद्रक्ष्माभृत्कुमारेण [1] वरमांबागर्भशुक्तिमुक्ताफलेन गोपालरायराजेंद्रेण विरचितायां श्रीरामचंद्रोदयव्याख्यायां विज्ञेयार्त्थदर्पणसमाख्यायां पंचप[2] उच्छ्वासः संपूर्णासी . . .

No. 474*a*.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वयंप्रकाशसरस्वतीपूज्यपादशिष्यश्रीमदखंडानंदसरस्वतीविरचिततर्कभाषाप्रकाशे अनुमानपरिच्छेदस्समाप्तः.

No. 480.

Colophon :— इति परमहंसपरिव्राजकाचार्य्यश्रीचिदानंदब्रह्मेंद्रसरस्वतीपूज्यपादशिष्यपरमानंदघनविरचिते धर्मशास्त्रसंग्रहे स्मृतिरत्नमहोदधौ षट्कर्मविचारः.

No. 482.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीसदाशिव . . . . राध्यशिष्यगोपालाश्रमयोगींद्रकृतौ त्रिशिखब्राह्मणमंत्राणां भाष्ये श्रीमद्बोधाख्ये अवधूतधर्म्मनिरूपणं नाम योगभावदितीय्यः [3] प्रबोधः.

---

[1] No. 385 reads वरिमांबा. [2] Read पञ्चम. [3] Read योगभावस्य (?) द्वितीयः.

No. 483.

Beginning :—

श्रीमच्चितलपाटिवंशशशिना दैवज्ञनेत्रोत्पला-
नंदं नाटयता गणेशमनिशं नत्वा मृडानीपतिं ।
श्रीमद्वेंकटयज्वना स्मृतिवचःपुंजं[1] समाकृष्य त-
त्पारं[2] निर्णयकौमुदी बुधजनानंदाय संतन्वते[3] ॥

No. 490.

Colophon :— इति श्रीतुलशीवंशावतंसवामनसूरितनूजन्मनः केशवस्य कृतं सिद्धांतमंजरीविवृतौ शब्दपरिच्छेदस्समाप्तः.

No. 493.

Beginning :—

श्रद्धाधनेन मुनिना मधुसूदनेन
संगृह्य शास्त्रनिचयं रचितातियत्नात् ।
बोधायनादिवि . . . च सत्वराणा-
मद्वैतसिद्धिरियमस्तु मुदे बुधानां ॥

No. 500.

Beginning :—

श्रीज्ञानेंद्रकृपापात्रं कृत्स्नतंत्रविवेचकं ।
श्रीमद्दंडेनृसिंहाख्यं सूरिं संकलये गुरुं ॥
नत्वा गुरून्नयस्मर्तॄन् द्वादशाहेज्यसूनुना ।
विविच्यतेग्निहोत्रेण टीका तत्वविवेचनी ॥

Colophon :— इति श्रीज्ञानेंद्रसरस्वतीचरणारविंदनिषेवकनिषेविणा श्रीरामान्वयप्रसूतद्वादशाहेज्यसूनुना अग्निहोत्रमनीषिणा विरचितायां तत्वविवेकटिप्पण्यां अद्वैतरत्नकोशपूरण्यां द्वितीय्यः[4] परिच्छेदः.

No. 501.

Beginning :—

निशम्य सकलं शास्त्रं ना[ना]गुरुमुखांबुजात् ।
अनुमानप्रकाशोयं रुचिदत्तेन तन्यते ॥

---

[1] Read °पुञ्जात्समा°. [2] Read तत्सारं. [3] Read संतन्यते. [4] Read द्वितीयः.

No. 502.

At the end of one of the chapters:— इति श्रीमन्महीधरकुलजलधिकौस्तुभकोंडुभट्टमहोपाध्यायतनूभवेन श्रीमन्नारायणेंद्रगुरुचरणकटाक्षनिक्षेपकोशगृहायमानेन लक्ष्मीनृसिंहचरणारविंदचंचरीकेण लक्ष्मीनृसिंहेन विरचितायां कल्पवृक्षप्रदीपिकायामाभोगाख्यायां चतुर्थस्याध्यायस्य प्रथमः पादः.

No. 506.

Colophon:— श्रीमत्कैवल्येंद्रसरस्वतीपूज्यपादशिष्यश्रीमद्ज्ञानेंद्रसरस्वतीपूज्यपादशिष्यश्रीमदभिनवनारायणेंद्रसरस्वतीपूज्यपादशिष्यश्रीम . . . . . दानंदब्रह्मेंद्रसरस्वतीपूज्यपादशिष्यश्रीपरमानंदघनविरचिते ब्रह्मसूत्रविवरणे श्रीचिदानंदब्रह्मविलासाख्ये चतुर्थस्याध्यायस्य *etc.*

No. 526.

At the end of the *Bâlakâṇḍa*:— इति श्रीमद्राजाधिराजराजपरमेश्वरश्रीनिम्मडिदेवरायविरचिते[1] महानाटकसूक्तिसुधानिधौ बालकांडस्समाप्तः.

At the end of the *Yuddhakâṇḍa*:—

[2]श्रीमान्निम्मडिदेवरायनृपतिः स्वर्लोककल्लोलिनी-
कल्लोलप्रतिमल्लसूक्तिविभवो विद्वज्जनश्लाघितः ।
धीमान् षष्ठवरेण्यकांडविषयान् व्यस्तान् महानाटक-
श्लोकान् वर्णपदक्रमोज्वलतरान्[3] रम्यानकार्षीत्प्रभुः ॥

No. 537.

Beginning:—

आसीच्चतुर्थान्वयचक्रवर्ती
वेमक्षितीशो जगदेकवीरः ।
एकादशेति प्रतिभाति शंका
येनावतार[ाः*] प्रथमस्य पुंस्सः ॥
राज्यं वेमस्सुचिरमकरोद्राज्यहेमाद्रिदानो[4]
भूमीदेवैभुवमुरुभुजो[5] भुक्तशेषामभुक्ति[6] ।
श्रीशैलाग्रात्प्रभवति पथि प्राप्तपाताळगंगा-
सोपानानि प्रथमपदवीमारुरुक्षुश्चकार ॥

---

[1] Read °श्रीमदिम्मडि°. [2] Read श्रीमानिम्मडि°. [3] Read °मोज्ज्वल°.
[4] Read °करोत्प्राज्य°. [5] Read °देवैर्भुव°. [6] Read °मभुङ्क्त.

माचक्षोणिपतिर्महेंद्रमहिमा वेमक्षितीशाग्रजो
रामाद्यैस्सदृशो बभूव सुगुणैस्तस्य त्रयो नंदनाः ।
कीर्त्या जाग्रति रेड्डिपोतनृपतिः श्रीकोमटींद्रस्ततो
नागक्ष्मापतिरित्युपात्तवपुषो धर्मार्थकामा इव ॥
[क]दाचिदास्थानगतिः कवीनां
काव्यामृतास्वादपरः प्रसंगात् ।

. . . . . .

अमृगकविना [1] रचितां शृंगाररसात्मिकां शतश्लोकीं ।
शृत्वा [2] विकसितचेतास्तदभिप्रायं प्रकाशितां नेतुं ॥
मूलश्लोकान् समाहृत्य प्रक्षिप्तान् परिहृत्य च ।
विधत्ते विदुषामिष्टां टीकां शृंगारदीपिकां ॥

No. 538.

Beginning :—

श्रीमद्व्येच्छमुकुंडवंशजलधेरासीद्यशःकौमुदी-
धौताशेषजगत्तमाश्शुचिरुची रंगप्रभुश्चंद्रमाः ।
तत्सूनुर्गुणरत्नरोहणगिरिश्शास्त्रप्रवीणो बुधः
श्रीमानर्थिसुरद्रुमो विजयते तिम्माजिमंत्रीश्वरः ॥
तस्यास्मि सूनुरमलप्रतिभश्च दृश्य-
श्रव्यप्रबंधरचनाचतुरः कळावान् ।
कर्ता मृदूक्तिभिरलंकृतिदर्शनानां
कर्ता पुनः कृतिकृते [3] न[र*]शिंहनामा ॥
काव्यप्रकाशिकोक्तानि सूत्राणि स्फुटमुद्धरन् ।
कारिकारूपिणां तेषामृजुवृत्तिं करोम्यहं ॥

No. 545.

Colophon :—

अथातोब्रह्मशब्दादीन् विचार्याखंडलक्षणान् ।
अखंडयच्च सत्यादिगिरां राघवदेशिकः ॥

[1] Read अमरुककविना. [2] Read श्रुत्वा. [3] Read नरसिंह°.

प्राचीनगुरुवर्गस्य सूक्तिमुक्ताकरंभितं[1] ।
वेदांतकौस्तुभं संतः कंठे बिभ्रत सादरं ॥

No. 546.

Colophon :—

कल्पद्रोः कविवादिसिंहविदुषः प्रज्ञासुधावारिधे-
र्जातः कश्चन कल्पितार्थविततिश्चंपूप्रबंधात्मना ।
तस्याम्नायकिरीटदेशिककथामाध्वीझरीमुद्वहन्
षष्ठोयं स्तबकः करोतु सुमनःकर्णावतंसश्रियं ॥

No. 554.

Beginning :—

व्युत्पित्सुमुदे कथयति दशरूपकवर्त्म कुरविरामकविः ।

No. 555.

Colophon :— इति श्रीभारद्वाजकुलजलधिकौस्तुभेन श्रीदेवराजस्य सूनुना श्रीनिवासदासेन विरचितायां पादुकासहस्रव्याख्यायां चित्रपद्धतिस्त्रिंशी.

No. 563.

At the end of an *adhyâya* :— इति भगवता यादवप्रकाशेन विरचिते पिंगळच्छंदोविचितिभाष्येष्टमोध्यायः.

No. 568.

Colophon :—

अधीत्य निखिलं शास्त्रमग्रजादीश्वरेष्टिनः ।
विदुषां प्रीतये येन व्याकृता शास्त्रदीपिका ॥
यत्नं विनैव विहिता येन तंत्रशिखामणिः ।
नव्या संकष्ट . . . न्यायमुक्तावळी तथा ॥
व्याकृता याजुषी शाखा तथोपनिषदोखिलाः ।
प्रणीता चाग्निदेः[2] . . प्रायश्चित्तप्रदीपिका ॥
न्यायचूडामणिर्नाम्ना न्यायजालोपबृंहिता ।
रुचिदत्तस्य वाख्या च रुचिदा येन निर्मिता ॥

---

[1] Read °करम्बितं. [2] Read °ग्निहोत्रादेः (?). [3] Read व्याख्या.

मणिदर्पणनामानं महितं वाङ्मुखं मणेः ।
खंडत्रयस्य दुर्वादिखंडनाय व्यधत्त यः ॥
येन शृंगारसर्वस्वनामभाणो व्यभण्यत ।
यश्चैकाह्ना भोजचंपूयुद्धकांडमपूरयत् ॥
येन भारतचंपूश्च वृत्तरत्नावळी तथा ।
सर्वतंत्रस्वतंत्रस्य श्रीनिवासममीशितुः[1] ॥
कर्त्तुर्विश्वजितो येन तातस्य यमिता कथा ।
रघुवीरस्य कृष्णस्य पांडवानां च या कथाः ॥
प्रत्यक्षरश्लेषमयै . . . .
र्यमिता मंजुभाषिण्या येन सीतापतेः कथा ॥
शंकराभ्युदयाभिख्यं काव्यं येनैव निर्मितं ।
काव्यं कंसवधं रुक्मिण्युद्वाहमपि यो व्यधात् ॥
येनोदिता कमलिनीकलहंसाख्यनाटिका ।
आनंदराघवन्नाम नाटकं च प्रपंचितं ॥
येन व्यतान्यलंकारमरामण्यभिधा[2] कृतिः ।
तथा वृत्तिविवेकेन विचित्रा चित्रमंजरी ॥
तेन व्यतानि श्रीराजचूडामणिमखींदुना ।
काव्यदर्पणनामासौ प्रबंधो विदुषां मुदे ॥

इति श्रीमतिद्योतिदिवाप्रदीपांकविश्वामित्रवंशमुक्ताफलाद्वैतविद्याचार्य्यसर्वतंत्रप्रतिदिनप्रबंधपरमेश्वरषड्भाषासार्वभौमसाग्निचित्यविश्वजिदतिरात्र्याजि[3]श्रीकृष्णभट्टलक्ष्मीभवस्वामिभट्टपुत्रसत्यमंगळरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीकेशवदीक्षितश्रीशेषाद्रिशेखरदीक्षितयोर्द्वैमात्रेयस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे दशम उल्लासः.

No. 569.

Beginning :— पोलमाख्या च जननी पौंडरीकाध्वरी पिता ।
अभूतां पितरौ यस्य तेनैव कविनाधुना ॥

---

[1] Read °यमीशितुः. [2] Read °कारशिरोम° (?). [3] Read °रात्रयाजि°.

वण्णमान्यान्वयांभोधिसंजातहिमभानुना ।
वाधूलगोत्रजन्येन वीरराघवसूरिणा ॥
समाहृत्य पुराणानि विदुषां प्रीतये मुदा ।
रामायणे प्रसंगाय रत्नावळिरिति क्रमात् ॥
संविन्मयश्च ग्रंथोयं वाल्मीकीय्ये[1] विरच्यते ।

This work may be identical with the *Vîrarâghavîya*, quoted by Dr. Burnell, *Tanjore Cat.* p. 162*a*.

No. 573.

Colophon :—

शाके नेत्र[महीध]राब्धिधरणीगण्ये च साधारणे
वर्षे श्रावणमासि निर्मलतरे पक्षे दशम्यां तिथौ ।
रामामात्यविनिर्मितः स्व . . . . मेध्य[2] रत्नाकरं
सोयं मेळकळानिदिर्मतिमतामाकल्पमाकल्पतां[3] ॥

इति श्रीमदभिनवभरताचार्य्यवाग्गेयकारतोडरमल्लतिम्मनंदनरामामात्यनिर्मिते स्वरमेळकळानिधौ रागप्रकरणं पंचमं.

No. 574.

Colophon :— इति श्रीसकलसदागमाचार्य्यश्रीगोपीनाथविठलचरणारविंदमकरंदलोलश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोपालगुरुपूज्यश्रीकृष्णाचार्य्यतनूजश्रीरामचंद्राचार्य्यविरचिता प्रक्रियाकौमुदी समाप्ता.

No. 589.

Colophon :— इति हरितकुलतिलकश्रीवत्सांकमिश्रसूनोः श्रीपराशरभट्टार्य्यापरनामधेयस्य श्रीरंगनाथस्य कृतौ श्रीमन्नामसहस्रविवरणे भगवद्गुणदर्प्पणे दशमं शतकं सनिर्गमनं संपूर्णं.

No. 600*a*.

Beginning :—

समानसंधेर्व्याख्यानं व्यक्तेर्नंतपरस्य च ।
क्रियते मल्लयार्येण पददर्पणसंज्ञिकं ॥

---

[1] Read वाल्मीकीये. [2] Read निर्मथ्य रत्नाकरं. [3] Read °निधि°.

No. 601.

Beginning :—

श्रीमंतं गणपं प्रणम्य शिरसा वाग्देवतां चोत्तमां ।
श्रीमद्व्यासकृपामृतं सुमनसा धृत्वा महानुग्रहात् ।
श्रीमद्बेलिमिकन्यनामपुरजस्सूरावधानीत्यहं
शिक्षाभाष्यमतस्त्वसंशयकरं वक्ष्ये बुधानां मुदे ॥

No. 603.

Beginning :—

आशौचपूर्वशतकं पितृमेधसारं
वाख्यां[1] तयोश्च दशनिर्णयगृह्यरत्ने ।
रत्नाकरं विबुधकंठविभूषणं च
प्राह प्रबंधमिति वैदिकसार्वभौमः ॥

Colophon :— इति हारीतकुलतिलकस्य वैदिकसार्वभौमस्य सरस्वतीवल्लभाचार्य्य पौत्रस्य रंगनाथसूरिपुत्रस्य श्रीमद्वेंकटनाथस्य कृतिषु गृह्यरत्नव्याख्याने कंठभूषणे सप्तम पटलः.

No, 605.

Colophon :— इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीभारद्वाजकुलतिलकश्रीम दनंतसोमयाजिवरतनयस्य श्रीरामचंद्रदीक्षितस्य कृतौ अग्निहोत्ररक्षामणौ प्रथमो मयूखः

No. 619.

Beginning :—

उदैरयमहं विष्णोः प्रसादादघनिर्णयं ।
तस्येदानीं यथाप्रज्ञं व्याख्यामाख्यातुमुत्सहे ॥

No. 630.

Colophon :—

त्रिलोचनध्यानविशुद्धकौमुदी-
विनिद्रचेतःकुमुदः कळानिधिः ।
स सोमवर्य्यो विततार सम्मतं
विपश्चितां भाष्यमिदं सुबोधकं ॥

---

[1] Read व्याख्ये.

No. 638.

Beginning :—

कर्मब्रह्माध्वनिष्ठस्य कृतिर्भूपतिभूपतेः ।
[1]वाख्याग्निहोत्रप्रश्नस्य विष्णुभट्टेन तन्यते ॥

At the end of one of the *paṭalas* :— इत्यापस्तंबीयाध्वरतंत्रस्वतंत्रव्याख्यायां प्रयोगरत्नमालायां षष्ठप्रश्ने तृतीय्यः[2] पटलः.

No. 643.

Beginning :—

सनत्कुमारो मतिमान् नमस्कृत्य स्वयंभुवे ।
वास्तुशो[ध]नकं नाम शास्त्रं वक्ष्यति यत्नतः ॥

No. 655.

Beginning :—

श्रीमद्वेंकटनाथाख्यान् वेळंगुडिनिवासिनः ।
जगद्गुरूनहं वंदे सर्वतंत्रप्रवर्तकान् ॥
येन चिंतामणौ टीका दशटीकाविभंजिनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥
टीका शशधरस्यापि बालव्युत्पत्तिदायिनी ।
पदयोजनया पंचपादिका व्याकृता तथा ॥
येन[3] बोधाय मंदानां वेदांतार्थावलंबिनी ।
धर्मराजाध्वरींद्रेण परिभाषा वितन्वते[4] ॥

No. 661.

Beginning :—

कंचंयज्ञप्रपंचे कमलहितसुतारातिसिद्धांतवेत्ता
वैरिंचे चंचरीको नरगिरिनृहरेः पादपंकेरुहस्य ।
आकांचि प्रांच येते[5] दधति मुकुरवद्यस्य पंचांगमेकं
सोयं श्रीवीरमांबाजलधिसुरतरुर्न्नारयार्य्यस्य सूनुः ॥
स कंचमेज्ञय . . . .
सुधीः कण्वशाखी सभाभ्यंतरेरं ।

[1] Read व्याख्या°.
[2] Read तृतीयः.
[3] Read तेन.
[4] Read वितन्यते.
[5] Read एते.

अदीपिकीं सगोपुरे कोंडपल्लिपुरीपुरे ।
सोहं करोमि बोधार्थं सम्यग्ज्योतिषदर्पणं ।
ज्योतिश्शास्त्रस्य सारं तदुज्वलं रविबिंबवत् ॥

No. 662*a*.

Beginning :—

जैमिनीयस्य सूत्रस्य लक्ष्मणाख्यसुधीरहं ।
ज्योतिःप्रदीपिका[1] नाम वृत्तिं कुर्वे यथामति ॥

---

[1] Read °पिकां.

INDEX.[1]

[1] The figures refer to the Numbers of the List of Manuscripts. Names of authors are printed in *italics*.